# नव्यन्यायरीत्या पदार्थविश्लेषणाभ्यासः – एकं अवलोकनम्[1] ।

## उपोद्घातः

पदार्थविश्लेषणम्

वैशेषिकदर्शनोक्तदिशा षट्पदार्थानां साधर्म्यवैधर्म्यमेव जगदां परस्परसापेक्षत्वम्[1] । परस्परसापेक्षत्वात् जगद्वस्तूनामपेक्षा बहुविधत्वमनिवार्यम् । अयमेव सापेक्षतावादः (Theory of relativity) । जगद्वस्तूनां सापेक्षत्वनिर्णयार्थं वैशेषिकदर्शने आचार्यः कणादः पदार्थाः षड्विधाः विभज्यन्ते । षड्विधपदार्थविभजनं पदार्थानां चतुर्विधानां पदनाम्नां आधारादेव कृतवान् । द्रव्यवाचिनी, गुणवाचिनी, क्रियावाचिनी, जातिवाचिनी च चतुर्विधानि पदनामानि । पदानां चतुर्विधत्वात् पदार्थाः द्रव्यगुणकर्मसामान्यभेदाश्चत्वारः । द्रव्यवाचिनी पदार्थाः द्रव्ये, गुणवाचिनी पदार्थाः गुणे, क्रियावाचिनी पदार्थाः कर्मे, जातिवाचिनी पदार्थाः सामान्ये च अन्तर्भवन्ति । साधर्म्यवैधर्म्यनिरूपणार्थं पदार्थानां भेदत्वं विशेषमूलकत्वञ्चाऽनिवार्यम् । अतः विशेषोऽप्यावश्यकः । अतः पञ्चमो पदार्थः विशेषः । गुणगुण्यादि, क्रियक्रियावन्तौ, जातिव्यक्त्यौ विशेषनित्यद्रव्याणां च भेदे सम्बन्धोऽप्यावश्यकः । अतः समवायः षष्टः पदार्थः।

वैशेषिकसूत्रे कणादाचार्येण अभावस्य पदार्थान्तरत्वं नाऽङ्कीक्रियते । तस्य वाक्यार्थत्वात् सः न पदार्थः किन्तु वाक्यार्थः । आद्यश्चत्वारद्रव्यगुणकर्मसामान्यानि इतरेषां दार्शनीकानामपि मते स्वीकृतानि । किन्तु इतरौ द्वौ विशेषसमवायौ सर्वशास्त्रान्तरे नाऽङ्कीक्रियन्ते । किन्तु पदार्थशास्त्रे पूर्वोक्तषट्पदार्थाः सर्वमप्यावश्यक एव । पदनाम्नां आश्रयेण पदार्थानां विभजनानन्तरमेव सापेक्षतावादो निर्णीयते । पदार्थशास्त्ररीत्या सापेक्षतावादः अतीव सरलतया वर्ण्यते । एकस्मिन् गृहे वसतां मनुजानां परस्परसापेक्षत्वात् परस्परापेक्षया भिन्नतया वर्तते । किन्तु तेषां स्थानेऽपि

[1] Anupriya P.A, Research scholor, Dept of Sanskrit Nyaya, SSUS Kalady.

संबन्धापेक्षया वैविद्यमस्ति । एकैव गृहयजमानस्य पत्नी एकस्य पत्नी, अपरस्य माता, अपरस्य भगिनी, अपरस्य पुत्री, अपरस्य शिष्या इत्यादिरीत्या परस्परं सम्बन्धो वर्तते । एतेषां परस्परसम्बन्धानां निरूप्यनिरूपकभावोऽस्ति[2] । यथा पतिनिरूपितपत्नीत्वं, पितृनिरूपितपुत्रीत्वं, पुत्रनिरूपितमातृत्वं, गुरुनिरूपितशिष्यत्वं , भ्रातृनिरूपितभगिनीत्वञ्च । सर्वत्रापि निरूप्यनिरूपकभावो अथवा धर्मधर्मीभावो[3] वर्तते । अत्र सर्वदा विश्लेषणमावश्यकम् । 'एवं विश्लेषणं यदि न ज्ञायते चेत्, तत्र साङ्कर्यमप्यनिवार्यमेव' । एकैव पुरुषः पत्यपि भवति, पितु अपि भवति, भ्रात अपि भवति, स्वाम्यपि भवति, मातुल अपि भवति निरूप्यनिरूपकभावेन अथवा धर्मधर्मिभावेन च ।

एतादृशरीत्या 'पदार्थविश्लेषणाभ्यास एव तर्कशास्त्रस्य प्रधानो विषयः, विशेषतो नवीनतर्कशास्त्रस्य' । निरूप्यनिरूपकभावेन अथवा धर्मधर्मिभावेन च विश्लेषणरीत्या पदार्थानाम् अभ्यासः क्रियते यत् शास्त्रं तदेव तर्कशास्त्रम् । पदार्थविश्लेषणाभ्यास एव नवीनतर्कशास्त्रस्य विशेषणम् । पदार्थानां परस्परसंबन्धाः बहुविधाः सन्ति । यथा अवच्छेद्यवच्छेदकभावः[5], आधाराधेयभावः[6], नियम्यनियामकभावः, पतिपत्नीभावः, निरूप्यनिरूपकभावः, प्रकारप्रकारीभावः, पितृपुत्रभावः, प्रतिपाद्यप्रतिपादकभावः, प्रतियोग्यनुयोगिभावः, लक्ष्यलक्षणभावः, विषयविषयीभावः[7], विशेषणविशेष्यभावः, व्याप्यव्यापकभावः, सेव्यसेवकभावः, जन्यजनकभाव इत्यादयः । एतादृशः पदार्थसंबन्धेषु अवच्छेद्यवच्छेदकभावः, आधाराधेयभावः, कार्यकारणभावः, प्रतियोग्यनुयोगिभावः[8], विषयविषयीभावः, जन्यजनकभावः च संबन्धानां प्रतिपाद्यविषयाः, उदाहरणसहितः तेषां समन्वयः च अस्मिन् प्रबन्धे क्रियते ।

1.आधाराधेयभावः ।

'**भूतले घटः**' ॥ भूतलशब्दात् ङिप्रत्यये विभक्तिकार्ये च भूतले इति शब्दः निष्पन्नः । भूतले इति सप्तमीविभक्तिः । सप्तमीविभक्तेः अधिकरणमर्थः । अधिकरणो नाम 'आधारोऽधिकरणम्' इति पाणिनीयसूत्रं ज्ञापकम् । अतः अत्र आधाराधेयभावः सम्बन्धः । भूतलनिष्ठाधिकरणता

घटनिष्ठाधेयता च । आधाराधेययोर्मध्ये निरूप्यनिरूपकभावसंबन्धः । अतः अत्र शाब्दबोधः तु भूतलनिष्ठाधिकरणतानिरूपिताधेयतावान् घटः इति ।

'भूतले घटः' इत्यत्र शाब्दबोधः त्रिविधौ वक्तुं शक्यते –

(१) भूतलनिष्ठाधिकरणतानिरूपिताधेयतावान् घटः ।

(२) भूतलनिष्ठाधिकरणतानिरूपको घटः ।

(३) भूतलनिरूपिताधेयवान् घटः ।

**'घटवत् भूतलम्'** ॥ घटशब्दात् मतुप् प्रत्यये घटवदिति रूपम् । अत्र अस्मिन्निति(सप्तमी) अर्थे मतुप् प्रत्ययः विहितः । सप्तमीविभक्तेः अधिकरणमर्थः । अत्र आधाराधेयभावः सम्बन्धः । भूतलनिष्ठाधिकरणता घटनिष्ठाधेयता च । किन्तु अत्र विशेष्यविशेषणौ भिन्नौ भवतः । घटवदिति विशेषणं, भूतलमिति विशेष्यम् । घटनिष्ठाधेयतानिरूपिता अधिकरणतावत् भूतलमिति शाब्दबोधः । अत्रापि शाब्दबोधः त्रिविधौ वक्तुं शक्यते ।

(१) घटनिष्ठाधेयतानिरूपिता अधिकरणतावत् भूतलम् ।

(२) घटनिष्ठाधेयतानिरूपकं भूतलम् ।

(३) घटनिरूपिताधिकरणताश्रयं भूतलम् ।

2.कार्यकारणभावः ।

**'दण्डजन्यो घटः'** ॥ दण्डात् जन्यः दण्डजन्यः इति विग्रहः । दण्डात् जन्यः घटः । जन्यपदस्य कार्यतावानर्थः । अतः अत्र कार्यकारणभावसंबन्धः । अथवा दण्डात् जायते इति दण्डजन्यः घटः । दण्डात् इति शब्देन पञ्चमीविभक्तिः बोध्यम् । पञ्चमीविभक्तेः कारणत्वमर्थः । कारणत्वस्य निरूपितात्वसम्बन्धेन कार्यतायामन्वयः । तथा च दण्डनिष्ठकारणतानिरूपितकार्यतावान् घटः इति बोधो जायते ।

(१) दण्डनिष्ठकारणतानिरूपिता कार्यतावान् घटः।

(२) दण्डनिष्ठकारणता निरूपकः घटः।

(३) दण्डनिरूपिताकार्यतावान् घटः।

‘**घटस्य कारणं दण्डम्**’॥ घटपदोत्तरषष्ठीविभक्तिः। षष्ठीविभक्तेः संबन्धमर्थः। ‘घटस्य कारणं दण्डम्’ इति वाक्यात् कार्यकारणभावो बोध्यम्। अतः घटस्य कारणमिति विशेषणम्-दण्डमिति विशेष्यम्। दण्डं कारणं घटं कार्यं च। अतः

(१) घटनिष्ठकार्यतानिरूपित कारणतावत् दण्डम्।

(२) घटनिरूपित कारणतावत् दण्डम्।

(३) घटनिष्ठकार्यतानिरूपकं दण्डम्।

3.प्रतियोग्यनुयोगिभावः।

‘**घटाभावः**’॥ अभावस्थले एव प्रतियोग्यनुयोगिभावः वर्तते। दत्तोदाहरणे अभावपदं दृश्यते चेत् प्रतियोग्यनुयोगिभावोऽपि स्पष्टः। का प्रतियोगि ? का अनुयोगि ? इति चेत् यस्याऽभावः सा प्रतियोगि सर्वदाभावः अनुयोगि। घटाभावः इत्यत्र प्रतियोग्यनुयोगिभावः। घटस्याभाववत्वात् घटः प्रतियोगि, अभावः अनुयोगि च। अतः अत्र शाब्दबोधः तु,

(१) घटनिष्ठप्रतियोगितानिरूपित अनुयोगितावान् अभावः।

(२) घटनिष्ठप्रतियोगितानिरूपकः अभावः।

(३) घटनिरूपितानुयोगितावान् अभावः।

‘**अभावस्य प्रतियोगि घटः**’॥ ‘घटाभावः’ इति शब्दार्थबोधमेव अत्रापि जायते। किन्तु ‘घटाभावः’ इति शब्दार्थस्य केवलविपरीतरूपेणैवात्र वक्तुं शक्यते। उभयमपि समानार्थकौ भवतः। अत्र

'अभावस्य प्रतियोगि घटः' इति वाक्यात् प्रतियोगि पददर्शनात् प्रतियोग्यनुयोगिभावः स्पष्टः। अत्र प्रतियोगि घटः अनुयोग्यभावः च। अतः अत्र शब्दार्थबोधस्तु,

(१) अभावनिष्ठानुयोगितानिरूपित प्रतियोगितावान् घटः।

(२) अभावनिष्ठानुयोगितानिरूपकः घटः।

(३) अभावनिरूपित प्रतियोगितावान् घटः।

4.जन्यजनकभावः।

'**कुलालेन घटो जायते**' ॥ कुलालेन इति तृतीया। तृतीयाविभक्तेः करणत्वमर्थः। 'असाधारणं कारणं करणम्' इति। घटं प्रति असाधारणं कारणं भवति कुलालः। अतः 'कुलालेन घटो जायते' इत्यत्र जन्यजनकभावः सम्बन्धः। कुलालः जनकः, घटः जन्यः च। जनकावच्छेदकधर्मः जनकता कुलाले, जन्यावच्छेदकधर्मः जन्यता घटे च। अतः अत्र शाब्दबोधार्थः तु,

(१) कुलालनिष्ठजनकतानिरूपित जन्यतावान् घटः।

(२) कुलालनिष्ठजनकतानिरूपकः घटः।

(३) कुलालनिरूपितजन्यतावान् घटः।

'**घटं निर्मीयते कुलालः**' ॥ अत्र घटम् इत्यस्य द्वितीयाविभक्तिः। द्वितीयाविभक्तेः कर्मत्वमर्थः। निर्मीयते इति पदेन जन्यत्वं बोध्यम्। अतः 'घटं निर्मीयते कुलालः' इत्यत्र जन्यजनकभावो सम्बन्धः। कुलालः जनकः घटः जन्यः च। अतः अत्र शाब्दबोधार्थः तु,

(१) घटनिष्ठजन्यतानिरूपित जनकतावान् कुलालः।

(२) घटनिष्ठजन्यतानिरूपकः कुलालः।

(३) घटनिरूपितजनकतावान् कुलालः।

5.विषयविषयीभावः।

'**चक्षुरिन्द्रियस्य विषयः तेजः**' ॥ चक्षुरिन्द्रियपदोत्तरषष्ठीविभक्तिः। षष्ठीविभक्तेः संबन्धार्थः। चक्षुरिन्द्रियस्य तैजसः च सम्बन्धः। चक्षुरिन्द्रियस्य तैजयोर्मध्ये विषयविषयीभावः सम्बन्धः। तैजसः चक्षुरिन्द्रियविषयत्वात्। अत्र तैजः विषयः, चक्षुरिन्द्रियं विषयी। विषयावच्छेदकधर्मः विषयता तैजसि, विषयतावच्छेदकधर्मो विषयिता चक्षुरिन्द्रिये च। अतः अत्र शाब्दबोधः तु,

(१) चक्षुरिन्द्रियनिष्ठविषयितानिरूपिता विषयतावान् तेजः।

(२) चक्षुरिन्द्रियनिष्ठविषयितानिरूपकं तेजः।

(३) चक्षुरिन्द्रियनिरूपितविषयतावान् तेजः।

'**तैजसः विषयी चक्षुरिन्द्रियः**' ॥ 'चक्षुरिन्द्रियस्य विषयः तेजः' इत्यत्र 'तैजसः विषयी चक्षुरिन्द्रियः' इत्यत्रापि उपलब्धः शाब्दबोधः तु एकैव। किन्तु शब्दार्थः विपरीतरीत्या एव वक्तुं शक्यते नैय्यायिकानां प्रथमान्तमुख्यविशेषत्वात्।

(१) तैजसनिष्ठविषयतानिरूपितविषयितावान् चक्षुरिन्द्रियः।

(२) तैजसनिष्ठविषयतानिरूपकः चक्षुरिन्द्रियः।

(३) तैजसनिरूपितविषयितावान् चक्षुरिन्द्रियः।

उपसंहारः

प्रथमान्तमुख्यविशेष्यकाः नैय्यायिकाः । प्रथमान्तमुख्यविशेषकत्वं नाम 'विशेषणतापन्नविशेष्यता मुख्यविशेष्यता'। अतः निरूप्यनिरूपकभावे अथवा धर्मधर्मिभावे वा पदार्थविश्लेषणाभ्यासेन शाब्दबोधः प्रथमान्तपदेनैव समाप्तम् । यथा 'भूतले घटः' इत्यत्र भूतलपदोत्तरसप्तमीविभक्तिः। सप्तमीविभक्तेः अधिकरणमर्थः, अधिकरणस्य आधारो पर्यायः। अत अत्र आधाराधेयभावो सम्बन्धः इति बोध्यम्। घटपदोत्तरप्रथमा विभक्तिः। अतः 'भूतले घटः'

इत्यत्र शाब्दबोधः प्रथमान्तपदः घटपदैव समाप्तम् । तथा च भूतलनिष्ठाधिकरणतानिरूपिताधेयतावान् घटः इति शाब्दबोधः। निरूप्यनिरूपकभावे सर्वत्रापि प्रथमान्तमुख्यविशेषकमेव प्रयुज्यते। गङ्गेशोपाध्यायेनैव नव्यन्यायमतो स्थापितम्। तस्य पुत्रः रघुनाथशिरोमणिना पुनः नव्यन्यायमतो विकसितः । प्राचीनन्यायदर्शनस्य तत्वचिन्ता पदार्थविश्लेषणाभ्यासरूपेण परामर्शमेव नव्यन्यायभाषा।

## पादटिप्पणी

1.'षट्पदार्थात्मकमिदं जगतपरस्परसापेक्षत्वमेव' , वरदाचार्यकृत आलोकव्याख्या, पृ.स. ८

2.एवञ्च एकस्य अधिकरणतायाम् अपरस्य वृत्तिता नियमा। अत एव वृत्तिताधिकरणतयोः परस्परनियतसापेक्षतया वृत्तिताधिकरणतयोश्च परस्परं निरूप्यनिरूपकभावोऽस्ति । नव्यन्यायभाषाप्रदीपः (p.no.54)

3.ध्रीयते तिष्ठति वर्तते यः सः धर्मः। धर्मः कुत्र वर्ततेति धर्मी। एतयोर्मध्ये स्थितः भावः धर्मधर्मिभावः। नव्यन्यायभाषाप्रदीपः (p.No.1)

4.अवच्छेदके विशेषणीभूतो धर्मः येन सम्बन्धेन तिष्ठति, सः सम्बन्धः अवच्छेदकतावच्छेदकसम्बन्धः। नव्यन्यायभाषाप्रदीपः, (p.No.81)

5.यच्च यत्र वर्तते तत् तस्य आधेयम् आश्रितं तद् वृत्तिरिति च उच्यते। यत्र तु तद् वर्तते, तत् तस्य अधिकरणम्, आधेयमर्थः। तयोर्मध्ये आधाराधेयभावः सम्बन्धः। (p.No,51).

6.विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वं कारणत्वम् । तज्जन्यत्वं कार्यत्वं, तयोर्मध्ये कार्यकारणभावसम्बन्धः। नव्यन्यायभाषाप्रदीपः हिन्दीव्याख्यानम्। (p.No.111).

7.विषयता विषयिता चेति अपरौ द्वौ वृत्यनियामकौ सम्बन्धौ। तत्र विषयाः घटपटादयो ज्ञानेच्छादौ विषयितासम्बन्धेन वर्तन्ते। नव्यन्यायभाषाप्रदीपः। हिन्दीव्याख्यानम्। (p.No.48)

8.अभावस्थले धर्म-धर्मिणोः सम्बन्धस्य धर्मः प्रतियोगि, धर्मी चानुयोगी। नव्यन्यायभाषाप्रदीपः । (p.No.50).

## सहायकग्रन्थाः

1. नव्यन्यायभाषाप्रदीपः, हिन्दी अनुवादसहितः, -महामहोपाध्यायमहेश्चन्द्रन्यायरत्नः, श्रुतभवनसंशोधनकेन्द्रः, पूणे,२०२८.
2. तर्कसंग्रहालोकव्याख्या, -नव्यमङ्गलाभिजनः वरदाचार्यः, आर्षग्रन्थप्रकाशनं, महीशूर् पुरि,२००७.
3. नव्यन्यायभाषाप्रदीपः, -डा.के.रतीष्, मेलिण्डा बुक्स्, तिरुवनन्तपुरं,२०२८.
4. अवच्छेदकत्वनिरुक्तिः, -श्रीजगदीशतर्कालङ्कारः, चौखम्भा संस्कृतसंस्थान्, वाराणसी, २०००.